# 1 वन्दे भारतमातरम्

(भारतमाता को प्रणाम करता हूँ/करती हूँ)

## वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

**1. अधः प्रदत्तानां प्रश्नानाम् एकपदेन-पदद्वयेन वा उत्तरं लिखन्तु—**

**(क) पर्वतराज कः?**

**उत्तरम्—** हिमालयः।

**(ख) समुद्रः कस्याः चरणौ प्रक्षालयति?**

**उत्तरम्—** भारतमातुः।

**(ग) त्रिवर्णयुतः ध्वजः कुत्र विलसति?**

**उत्तरम्—** भारतमातुः हस्ते।

**(घ) ध्वजस्थितः केशरवर्णः अस्मान् किं वक्तुं प्रेरयति?**

**उत्तरम्—** जयतु सैनिकः।

**(ङ) कृषकबान्धवाः भारतभूमिं कैः सिञ्चन्ति?**

**उत्तरम्—** स्व-स्वेदबिन्दुभिः।

**(च) केषां धवलयशः राष्ट्रध्वजस्य मध्ये विलसति?**

**उत्तरम्—** वैज्ञानिकानाम्।

**(छ) सूर्यः कं विना नित्यं सञ्चरति?**

**उत्तरम्—** विरामम् विना।

**2. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

**(क) पवित्राः नद्यः काः?**

**उत्तरम्—** पवित्राः नद्यः गङ्गा, यमुना, सरस्वती, सिन्धुः, ब्रह्मपुत्रः, गण्डकी, महानदी, नर्मदा, गोदावरी, कृष्णा, कावेरी, इत्यादयः सन्ति।

**(ख) विविधेभ्यः प्रदेशेभ्यः जनाः किमर्थम् आगच्छन्ति?**

**उत्तरम्—** तीर्थक्षेत्राणां धूलिं ललाटे स्थापयितुं विविधेभ्यः प्रदेशेभ्यः असंख्याः जनाः आगच्छन्ति।

**(ग) धर्मचक्रं कं भावं बोधयति?**

**उत्तरम्—** धर्मचक्रं 'चलनीयं कर्त्तव्यपथे वै, न विरम, सततं चलः' इति भावं बोधयति।

**(घ) कृषकबान्धवानाम् परिश्रमेण भारतभूमिः कथं सञ्जाता?**

**उत्तरम्—** कृषक बान्धवानां परिश्रमेण एव भारतभूमिः हरितवर्णमयी, समृद्धा सस्यश्यामला च सञ्जाता।

**(ङ) विज्ञानस्य केषु क्षेत्रेषु भारतीयैः यशः प्राप्तम्?**

**उत्तरम्—** अणुशास्त्रे, सङ्गणकशास्त्रे, चिकित्साशास्त्रे अन्तरिक्षशास्त्रे, आयुधशास्त्रे, इत्यादिषु क्षेत्रेषु भारतीयैः यशः प्राप्तम्।

**(च) अन्ते सर्वे किं गीतं गायन्ति?**

**उत्तरम्—** अन्ते सर्वे मिलित्वा इदं गीतं गायन्ति—

वयं बालकाः भारतभक्ताः,
वयं बालिकाः भारतभक्ताः।
वयं हि सर्वे भारतभक्ताः,
पृथ्वीं स्वर्गं जेतुं शक्ताः॥

**3. रेखाङ्कितानि पदानि आश्रित्य उदाहरणानुसारं प्रश्न निर्माणं कुर्वन्तु—**

**यथा—** <u>अस्माकं</u> वत्सला भारतमाता।
केषां वत्सला भारतमाता?

**(क) समुद्रः <u>भारतमातुः</u> चरणौ प्रक्षालयति।**

**उत्तरम्—** समुद्रः कस्याः चरणौ प्रक्षालयति?

**(ख) जनाः तीर्थ क्षेत्राणां धूलिं <u>ललाटे</u> स्थापयति।**

**उत्तरम्—** जनाः तीर्थक्षेत्राणां धूलिं कुत्र स्थापयति?

**(ग) <u>वीराः</u> भारतमातुः सर्वदा सेवां कृतवन्तः।**

**उत्तरम्—** के भारतमातुः सर्वदा सेवां कृतवन्तः?

**(घ) 'जयतु कृषकः' इति वक्तुम् <u>अस्मान्</u> प्रेरयति।**

**उत्तरम्—** जयतु कृषकः इति वक्तुम् कः प्रेरयति?

**(ङ) <u>नदी</u> कष्टानि सहमाना प्रवहति।**

**उत्तरम्—** का कष्टानि सहमाना प्रवहति?

**(च) वयं गौरववर्धनार्थं <u>प्रयत्नं</u> कुर्मः।**

**उत्तरम्—** वयं गौरववर्धनाय किं कुर्मः?

**4. अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं रिक्तस्थानेषु रूपाणि लिखन्तु—**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | चरणम् | चरणौ | ............ (द्वितीया विभक्ति) |
| (ख) | नदी | ............ | नद्यः (प्रथमा विभक्ति) |

(ग) ललाटे ............. ............. (सप्तमी विभक्ति)

(घ) देशाय ............. ............. (चतुर्थी विभक्ति)

(ङ) चक्रम् ............. चक्राणि (प्रथमा विभक्ति)

(च) ............. ............. वैज्ञानिकैः (तृतीया विभक्ति)

(छ) अहम् ............. ............. (प्रथमा विभक्ति)

(ज) विज्ञानस्य ............. ............. (षष्ठी विभक्ति)

**उत्तरम्—**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|
| (क) चरणम् | चरणौ | चरणाः (द्वितीया विभक्ति) |
| (ख) नदी | **नद्यौ** | नद्यः (प्रथमा विभक्ति) |
| (ग) ललाटे | **ललाटयोः** | **ललाटेषु** (सप्तमी विभक्ति) |
| (घ) देशाय | **देशाभ्याम्** | **देशेभ्यः** (चतुर्थी विभक्ति) |
| (ङ) चक्रम् | **चक्रे** | चक्राणि (प्रथमा विभक्ति) |
| (च) **वैज्ञानिकेन** | **वैज्ञानिकाभ्याम्** | वैज्ञानिकैः (तृतीया विभक्ति) |
| (छ) अहम् | **आवाम्** | **वयम्** (प्रथमा विभक्ति) |
| (ज) विज्ञानस्य | **विज्ञानयोः** | **विज्ञानानाम्** (षष्ठी विभक्ति) |

5. **अधः प्रदत्तानि वाक्यानि पठित्वा मातृभाषायां/प्रान्तीय भाषायाम्/आङ्ग्लभाषायां वा अनुवादं कुर्वन्तु—**

(क) भारतभूमौ पवित्राः नद्यः प्रवहन्ति।

**उत्तरम्—** भारतभूमि पर पवित्र नदियाँ बहती हैं।

(ख) भारतस्य मस्तके हिमालयः मुकुटरूपेण शोभते।

**उत्तरम्—** भारत के मस्तक पर हिमालय मुकुट के रूप में सुशोभित है।

(ग) भारतभूमौ श्रेष्ठाः पर्वताः विराजन्ते।

**उत्तरम्—** भारतभूमि पर श्रेष्ठ पर्वत विराजमान हैं।

(घ) राष्ट्रध्वजे केशरः, श्वेतः, हरितः च वर्णाः सन्ति।

**उत्तरम्—** राष्ट्रीय ध्वज में केसरिया, सफेद और हरे रंग हैं।

(ङ) वयं सर्वे भारते जन्म प्राप्तवन्तः।

**उत्तरम्—** हम सबने भारत में जन्म लिया है।

6. **अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखन्तु—**

| **शब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|
| (क) भारतमाता | प्रथमा विभक्तिः | एकवचनम् |
| (ख) नद्यः | ............... | ............... |
| (ग) ललाटे | ............... | ............... |
| (घ) तीर्थक्षेत्राणाम् | ............... | ............... |
| (ङ) देशस्य | ............... | ............... |
| (च) बलिदानम् | ............... | ............... |
| (छ) कृषीवलबान्धवाः | ............... | ............... |
| (ज) अस्मान् | ............... | ............... |
| (झ) क्षेत्रेषु | ............... | ............... |

**उत्तरम्—**

| **शब्द** | **विभक्ति** | **वचनम्** |
|---|---|---|
| (क) भारतमाता | **प्रथमा विभक्तिः** | **एकवचनम्** |
| (ख) नद्यः | प्रथमा | बहुवचनम् |
| (ग) ललाटे | सप्तमी | एकवचनम् |
| (घ) तीर्थक्षेत्राणाम् | षष्ठी | बहुवचनम् |
| (ङ) देशस्य | षष्ठी | एकवचनम् |
| (च) बलिदानम् | द्वितीया | एकवचनम् |
| (छ) कृषीवबलबान्धवाः | प्रथमा | बहुवचनम् |
| (ज) अस्मान् | द्वितीया | बहुवचनम् |
| (झ) क्षेत्रेषु | सप्तमी | बहुवचनम् |

7. **पाठे प्रयुक्तानि क्रियापदानि रिक्तस्थानेषु लिखन्तु—**

शृणुमः .......... .......... ..........

.......... .......... .......... ..........

.......... .......... .......... ..........

.......... .......... .......... ..........

**उत्तरम्—**

| | | | |
|---|---|---|---|
| शृणुमः | शोभते | प्रक्षालयति | विराजन्तु |
| आगच्छन्ति | सुशोभन्ते | विलसति | प्रयच्छति |
| अस्ति | प्रेरयति | जयतु | सिञ्चन्ति |
| परिपोषयति | सन्ति | गायामः | कुर्मः |

8. **अधः प्रदत्तानां क्रियापदानां त्रिषु पुरुषेषु त्रिषु वचनेषु च लट् लकारस्य रूपाणि लिखन्तु—**

| **पुरुष** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | भवति | ............. | ............. |
| मध्यम | ............. | ............. | ............. |
| उत्तम | ............. | ............. | ............. |

**उत्तरम्—**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | भवति | भवतः | भवन्ति |
| मध्यम | भवसि | भवथः | भवथ |
| उत्तम | भवामि | भवावः | भवामः |

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | अस्ति | ............. | ............. |
| मध्यम | ............. | ............. | ............. |
| उत्तम | ............. | ............. | ............. |

**उत्तरम्—**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | अस्ति | स्तः | सन्ति |
| मध्यम | असि | स्थः | स्थ |
| उत्तम | अस्मि | स्वः | स्मः |

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | ............. | ............. | ............. |
| मध्यम | ............. | ............. | ............. |
| उत्तम | ............. | ............. | इच्छामः |

**उत्तरम्—**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | इच्छति | इच्छतः | इच्छन्ति |
| मध्यम | इच्छसि | इच्छथः | इच्छथ |
| उत्तम | इच्छामि | इच्छावः | इच्छामः |

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | ............. | ............. | आगच्छन्ति |
| मध्यम | ............. | ............. | ............. |
| उत्तम | ............. | ............. | ............. |

**उत्तरम्—**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | आगच्छति | आगच्छतः | आगच्छन्ति |
| मध्यम | आगच्छसि | आगच्छथः | आगच्छथ |
| उत्तम | आगच्छामि | आगच्छावः | आगच्छामः |

# अतिरिक्त अभ्यासः

1. **अधः प्रदत्तेषु विकल्पेषु उचितं विकल्पं चिनुत—**

(क) 'आनन्दमठः' इति अस्ति—
(अ) उपन्यासम् (ब) निबन्धम्
(स) कथाम् (द) काव्यम्

(ख) 'अहं मातुः वन्दनं करोमि।' रेखांकित पदे विभक्ति अस्ति—
(अ) प्रथमा (ब) तृतीया
(स) षष्ठी (द) सप्तमी

(ग) 'वन्दे मातरम्' गीतम् कति भाषायाम् वर्तते।
(अ) एकम् (ब) द्वये
(स) तिस्रः (द) चत्वारः

(घ) 'आनन्दमठः' उपन्यासं लिखतम् अस्ति—
(अ) रविन्द्रेण
(ब) बङ्किमचन्द्र चट्टोपाध्यायेन
(स) सुभाषेण (द) शरच्चन्द्रेण

(ङ) वत्सला का ?
(अ) भारत माता (ब) धरती माता
(ग) देवी माता (द) सरस्वती

(च) 'हरितवर्ण' पदस्य हिन्दी अर्थम् अस्ति—
(अ) हरा (ब) हरा रंग
(स) काला (द) लाल

**उत्तराणि—**(क) (अ), (ख) (स), (ग) (ब), (घ) (ब), (ङ) (अ), (च) (ब)।

2. **सत्यम् असत्यं वा लिखत।**

(क) केशरवर्ण शौर्यस्य प्रतीकम् अस्ति। ( )
(ख) ''जयतु सैनिकः'' इति वक्तुं हरितवर्णः अस्मान् प्रेरयति। ( )
(ग) भारतमातुः हस्ते विलसति द्विवर्णयुक्तः राष्ट्रध्वज। ( )
(घ) कृषकः बान्धवाः भारतभूमि स्व-स्वेदबिन्दुभिः सिञ्चन्ति। ( )

**उत्तराणि—**(क) सत्यम् (ख) असत्यम् (ग) असत्यम् (घ) सत्यम्।

**3. उचितं विकल्पं लिखित्वा रिक्तस्थानानि पूर्तिं कुरुत—**

(क) एषा अस्माकं ............. भारतमाता।

(ख) मङ्गलानितीर्थ क्षेत्राणि ............. सुशोभन्ते।

(ग) ध्वजस्य मध्ये ............. विराजते।

(घ) ......... ध्वजस्य ऊर्ध्वभागे केशरवर्ण विराजते।

**उत्तराणि**—(क) वत्सला (ख) भारतभूमौ (ग) चक्रम् (घ) त्रिवर्ण।

**4. 'क' स्तम्भे पदानि दत्तानि 'ख' स्तम्भे समानार्थक पदानि तयोः समीचीनं संयोगं कुरुत।**

| | 'क' | 'ख' |
|---|---|---|
| 1. | कष्टानि | वैज्ञानिकैः |
| 2. | सततं | सत्यस्य |
| 3. | भारतीयैः | चल |
| 4. | शान्तेः | सहमाना |

**उत्तरम्—**

| | **'क'** | **'ख'** |
|---|---|---|
| 1. | कष्टानि | सहमाना |
| 2. | सततं | चल |
| 3. | भारतीयैः | वैज्ञानिकैः |
| 4. | शान्तेः | सत्यस्य |

**5. एकपदेन वा द्विपदेन उत्तरत—**

(क) वयं सर्वे मिलित्वा किं गायामः?

(ख) नदी कष्टानि सहमाना अपि कं प्रति नित्यं प्रवहति?

(ग) 'अराः' पदे वचनम् अस्ति।

(घ) ''अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति।'' संख्यापदं चिनुत।

(ङ) गङ्गा का?

**उत्तरम्**— (क) भारतमातुः गीतम्। (ख) ध्येयं प्रति। (ग) बहुवचनम्। (घ) चतुर्विंशतिः। (ङ) पवित्राः नदी।

**6. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरत—**

**(क) नद्यः अस्माकं काम् इव?**

**उत्तरम्**— नद्यः अस्माकं मातरः इव।

**(ख) महेन्द्रः, मलयः, विन्ध्यः, अरावलिः इत्यादयः के सन्ति?**

**उत्तरम्**— महेन्द्रः, मलयः, विन्ध्यः, अरावलिः इत्यादयः पवित्राः पर्वताः सन्ति।

**(ग) समुद्रः कस्याः चरणौ प्रक्षालयति?**

**उत्तरम्**— समुद्रः भारतमातुः चरणौ प्रक्षालयति।

**(घ) त्यागपरम्परायाः सूचकः वर्णः कथ्यते?**

**उत्तरम्**— केशरः वर्णः त्याग परम्परायाः सूचकः वर्णः कथ्यते। ●●

# 2 नित्यं पिबामः सुभाषितरसम्

(हम सब नित्य सुन्दर कथन रूपी रस का पान करते हैं)

## अभ्यासः

वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—**

**(क) नरः कतिभिः वकारैः पूजितः भवति?**

**उत्तरम्**— पञ्चभिः वकारैः।

**(ख) पुरुषेण कति दोषाः हातव्याः?**

**उत्तरम्**— षड्दोषाः।

**(ग) बुद्धिः केन शुध्यति?**

**उत्तरम्**— ज्ञानेन।

**(घ) जलबिन्दुनिपातेन क्रमशः कः पूर्यते?**

**उत्तरम्**— घटः।

**(ङ) आलस्यं केषां महान् रिपुः अस्ति?**

**उत्तरम्**— मनुष्याणाम्।

**2. निम्नलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—**

**(क) नरः कथं पूजितो भवति?**

**उत्तरम्**— वस्त्रेण वपुषा, वाचा, विद्यया:, विनयेन, च इति एतैः पञ्चभिः वकारैः युक्तः नरः पूजितः भवति।

**(ख) पुरुषेण के दोषाः हातव्याः?**

**उत्तरम्—** पुरुषेण निद्रा, तन्द्रा, भयं, क्रोधः आलस्यं, दीर्घसूत्रता इति षड्दोषा: हातव्या:।

**(ग) कस्य बुद्धिः विस्तारिता भवति?**

**उत्तरम्—** यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति च तस्य बुद्धिः दिवाकर किरणैः, नलिनी दलम् इव विस्तारिता भवति।

**(घ) किं कृत्वा मनुष्यः नावसीदति?**

**उत्तरम्—** परिश्रमं कृत्वा मनुष्य नावसीदति।

**(ङ) व्यासस्य वचन द्वयं किम्?**

**उत्तरम्—** परोपकारः पुण्याय पापाय परपीडनम्।

**3. उदाहरणानुसारं श्लोकांशान् यथोचितं योजयन्तु—**

(क) विद्यया वपुषा वाचा — निद्रा तन्द्रा भयं क्रोध
वस्त्रेण विनयेन च। — आलस्यं दीर्घसूत्रता॥

(ख) षड् दोषाः पुरुषेणेह — वकारैः पञ्चभिर्युक्तो नरो
हातव्या भूतिमिच्छता। — भवति पूजितः॥

(ग) अद्भिर्गात्राणि शुध्यन्ति — वर्षं तद् भारतं नाम भारती
मनः सत्येन शुध्यति। — यत्र सन्ततिः॥

(घ) उत्तरं यत् समुद्रस्य — स हेतुः सर्वविद्यानां
हिमाद्रेश्चैव दक्षिणम्। — धर्मस्य च धनस्य च॥

(ङ) जलबिन्दुनिपातेन — विद्यातपोभ्यां भूतात्मा
क्रमशः पूर्यते घटः — बुद्धिर्ज्ञानेन शुध्यति॥

**उत्तरम्—**

(क) विद्यया वपुषा वाचा — वकारैः पञ्चभिर्युक्तो नरो
वस्त्रेण विनयेन च। — भवति पूजितः॥

(ख) षड् दोषाः पुरुषेणेह — निद्रा तन्द्रा भयं क्रोध
हातव्या भूतिमिच्छता। — आलस्यं दीर्घसूत्रता॥

(ग) अद्भिर्गात्राणि शुध्यन्ति — विद्यातपोभ्यां भूतात्मा
मनः सत्येन शुध्यति। — बुद्धिर्ज्ञानेन शुध्यति॥

(घ) उत्तरं यत् समुद्रस्य — वर्षं तद् भारतं नाम भारती
हिमाद्रेश्चैव दक्षिणम्। — यत्र सन्ततिः॥

(ङ) जलबिन्दुनिपातेन — स हेतुः सर्वविद्यानां
क्रमशः पूर्यते घटः। — धर्मस्य च धनस्य च॥

**4. निम्नलिखितानां वाक्यानां समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखन्तु—**

**(क) मधुरवाण्या सर्वे प्रसन्ना भवन्ति।**

**उत्तरम्—** प्रिय वाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः।

**(ख) परिश्रमेण तुल्यः बान्धवः नास्ति।**

**उत्तरम्—** नास्त्युद्यमसमो बन्धुः।

**(ग) परोपकारेण मानवस्य पुण्यार्जनं भवति।**

**उत्तरम्—** परोपकार पुण्याय भवति।

**(घ) हिन्दमहासागरात् हिमालयपर्यन्तं भारतवर्षम्।**

**उत्तरम्—** उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥

**5. अधोलिखितानां शब्दानाम् उदाहरणानुसारं पर्यायपदानि लिखन्तु—**

**यथा—** वपुः — शरीरम्

(क) जलम् — __________

(ख) लोचनम् — __________

(ग) धनम् — __________

(घ) बुद्धि — __________

(ङ) रिपुः — __________

**उत्तरम्—**

(क) जलम् — वारि, नीरम्, तोयम्

(ख) लोचनम् — नेत्रम्, चक्षुः, अक्षिः

(ग) धनम् — सम्पदाम्, संपत्तिम्, द्रव्यम्

(घ) बुद्धि — मनीषा, प्रज्ञा, शेमुषी, मतिः

(ङ) रिपुः — शत्रु, अरिः, वैरिः

## अत्र इदम् अवधेयम् (यहाँ इसे जानें)

**तृतीयाविभक्तेः शब्दरूपाणि उच्चैः पठन्तु स्मरन्तु च**

| | शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **पुंलिङ्गशब्दाः** | छात्र | छात्रेण | छात्राभ्याम् | छात्रैः |
| | शिक्षक | शिक्षकेण | शिक्षकाभ्याम् | शिक्षकैः |
| **स्त्रीलिङ्गशब्दाः** | विद्या | विद्यया | विद्याभ्याम् | विद्याभिः |
| | छात्रा | छात्रया | छात्राभ्याम् | छात्राभिः |
| **नपुंसकलिङ्गशब्दाः** | सत्य | सत्येन | सत्याभ्याम् | सत्यैः |
| | ज्ञान | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| | किम् | केन | काभ्याम् | कैः |

6. **अधः रिक्तस्थानानि तृतीयाविभक्तेः समुचितरूपैः पूरयन्तु—**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सुधाखण्डेन | सुधाखण्डाभ्याम् | सुधाखण्डैः |
| वृक्षेण | .................... | .................... |
| .................... | लताभ्याम् | लताभिः |
| .................... | देशाभ्याम् | देशैः |
| पुण्येन | .................... | .................... |
| .................... | .................... | विनयैः |

**उत्तरम्—**

| एकवचनम् | द्विवचनम | बहुवचनम् |
|---|---|---|
| सुधाखण्डेन | सुधाखण्डाभ्याम् | सुधाखण्डैः |
| वृक्षेण | वृक्षाभ्याम् | वृक्षैः |
| लतया | लताभ्याम् | लताभिः |
| देशेन | देशाभ्याम् | देशैः |
| पुण्येन | पुण्याभ्याम् | पुण्यैः |
| विनयेन | विनयाभ्याम् | विनयैः |

7. **कोष्ठके पदानि विलिख्य सुभाषितं पूरयन्तु—**

| | | | | |
|---|---|---|---|---|
| उत्तरम् | यत् | ......... | हिमाद्रेश्चैव | ......... |
| ......... | तद्भारतं | ......... | भारती यत्र | ......... |
| ............ | सर्वे | तुष्यन्ति | ......... | |
| तस्मात् | ......... | वक्तव्यम् | वचने का | ......... |

**उत्तरम्—**

| | | | | |
|---|---|---|---|---|
| यत् | **समुद्रस्य** | हिमाद्रेश्चैव | **दक्षिणम्** | |
| **वर्षं** | तद्भारतं | **नाम** | भारती यत्र | **सन्ततिः** |
| **प्रियवाक्यप्रदानेन** | **सर्वे** | तुष्यन्ति | **जन्तवः** | |
| तस्मात् | **तदेव** | वक्तव्यम् | वचने का | **दरिद्रता** |

8. **उपर्युक्तानि सुभाषितानि पठित्वा रिक्तस्थानानि पूरयन्तु—**

(क) आलस्यं हि मनुष्याणां शरीरस्थो .......... रिपुः।

(ख) .................... वचने का दरिद्रता।

(ग) यः पठति लिखति पृच्छति ....................।

(घ) स हेतुः सर्वविद्यानां .................... धनस्य च।

(ङ) .................... बुद्धिर्ज्ञानेन शुध्यति।

**उत्तरम्—** (क) महान्, (ख) तस्मात् तदेव वक्तव्यं, (ग) पश्यति परिपृच्छति पण्डितानुपाश्रयति, (घ) धर्मस्य च (ङ) विद्यातपोभ्यां भूत्मा।

## अतिरिक्त अभ्यासः

1. **समुचित उत्तरस्य क्रमाक्षरं लिखत—**

(क) श्रेष्ठ जनैः उक्तानि सुवचनानि कथ्यते—

(अ) पद्यानि (ब) श्लोकानि

(स) सुभाषितानि (द) सत्काव्यम्

(ख) 'सुभाषितानि' पदे उपसर्ग अस्ति—

(अ) सु (ब) सुभा

(स) तानि (द) सुभ

(ग) 'नित्यं पिबामः सुभाषितरसम्।' इति कथने 'पिबामः' पदे पुरुषः अस्ति—

(अ) प्रथमपुरुषः (ब) मध्यम पुरुषः

(स) उत्तम पुरुषः (द) महापुरुषः

(घ) अस्माभिः कर्त्तव्यं-अकर्त्तव्यं इति बोधयन्ति—

(अ) ग्रन्थाः (ब) पुस्तकानि

(स) सुभाषितानि (द) व्यञ्जनानि

(ङ) 'भाष्' धातु युक्तं पदम् अस्ति—

(अ) सूक्तम् (ब) सुभाषितम्

(स) भासुरम् (द) विभासति

**उत्तराणि—**(क) (स), (ख) (अ), (ग) (स), (घ) (स), (ङ) (ब)।

2. **रिक्तस्थानानि उचित पदेन पूरयत—**

(क) बुद्धिः ............... शुध्यति। (ज्ञानेन/रसेन)

(ख) जलबिन्दुनिपातेन क्रमशः ............ पूर्यते। (घटः/कूपम्)

(ग) उत्तरं यत् ............... हिमाद्रेश्चेव दक्षिणम्। (कैलासस्य/समुद्रस्य)

(घ) परिश्रमं ............... मनुष्यः नावसीदति। (कृत्वा/अकृत्वा)

**उत्तराणि—**(क) ज्ञानेन (ख) घटः (ग) समुद्रस्य (घ) कृत्वा।

3. **सत्य/असत्यम् विचारयित्वा लिखत—**

(क) नित्यं पिबामः सुभाषितरसम्। ( )

(ख) सुभाषितानां पठनेन धनं वर्धते। ( )

(ग) विद्या विनयेन शोभते। ( )

(घ) आलस्यं हि मनुष्याणां शरीरस्थो महान् मित्रम्। ( )

**उत्तराणि—**(क) सत्यम् (ख) असत्यम् (ग) सत्यम् (घ) असत्यम्।

4. **सुमेलन—**

| | 'क' | 'ख' |
|---|---|---|
| 1. | हेतुः | अन्येभ्यः कष्ट प्रदानम् |
| 2. | उपाश्रयति | सत्कर्मणां फलम् |
| 3. | पुण्यं | समीपं गच्छति |
| 4. | परपीडनम् | कारणम् |

**उत्तरम्—**

| | 'क' | 'ख' |
|---|---|---|
| 1. | हेतुः | कारणम् |
| 2. | उपाश्रयति | समीपं गच्छति |
| 3. | पुण्यं | सत्कर्मणां फलम् |
| 4. | परपीडनम् | अन्येभ्यः कष्ट प्रदानम् |

5. **एकपदेन उत्तरत—**

(क) कया सर्वे प्रसन्नाः भवन्ति?

(ख) परिश्रमेण तुल्यः के नास्ति?

(ग) परोपकारेण मानवस्य केषाम् अर्जनं भवति?

(घ) कस्मात् हिमालयपर्यन्तं भारतवर्षम्?

**उत्तराणि—**(क) मधुरवाण्या। (ख) बान्धवः। (ग) पुण्यानाम्। (घ) हिन्दमहासागरात्।

6. **पूर्णवाक्येन उत्तरत—**

**(क) भूतात्मा काभ्यां शुद्धं भवति?**

**उत्तरम्—** विद्या तपोभ्यां भूतात्मा शुद्धं भवति।

**(ख) षड्दोषाः केन हातव्या?**

**उत्तरम्—** विद्या तपोभ्यां भूतात्मा शुद्धं भवति।

**(ग) जीवने निरन्तरं कस्य आवश्यकता अस्ति?**

**उत्तरम्—** जीवने निरन्तरं अभ्यासस्य आवश्यकता अस्ति।

**(घ) भारतवर्षस्य नागरिकाः के कथ्यन्ते?**

**उत्तरम्—** भारतवर्षस्य नागरिकाः भारतीयाः कथ्यन्ते।

●●

# 3 मित्राय नमः

(मित्र के लिए नमस्कार है।)

## अभ्यासः

### वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—**

**(क) शुभं भवतु इति कः वदति?**

**उत्तरम्—** आचार्या।

**(ख) योगिता आचार्यां 'किं शिक्षयतु' वदति?**

**उत्तरम्—** सूर्यनमस्कारं।

**(ग) सूर्यनमस्कारः कतीनाम् आसनानां समाहारः अस्ति?**

**उत्तरम्—** द्वादशानाम् ।

**(घ) केषु सूर्यनमस्कारः श्रेष्ठः?**

**उत्तरम्—** योगासनेषु।

**(ङ) सूर्यनमस्कारेण जनाः कीदृशं शरीरं प्राप्नुवन्ति?**

**उत्तरम्—** स्वस्थः शरीरः।

2. **अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—**

**(क) सर्वे छात्राः आचार्यां किं पृच्छन्ति?**

**उत्तरम्—** सर्वे छात्राः आचार्यां योगासनं पृच्छन्ति।

**(ख) सूर्यनमस्कारः इत्यनेन कः आशयः?**

**उत्तरम्—** सूर्याय नमस्कारः अस्ति।

**(ग) आचार्या कं श्लोकं पाठयति?**

**उत्तरम्—** आचार्या निम्न श्लोकं पाठयति—

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने-दिने।
आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते॥

**(घ) सूर्यनमस्कारस्य प्रथमः मंत्रः कः?**

**उत्तरम्—** सूर्यनमस्कारस्य प्रथमः मंत्र अस्ति— ॐ मित्राय नमः।

**(ङ) सूर्यनमस्कारेण कीदृशं बलं वर्धते?**

**उत्तरम्—** सूर्यनमस्कारेण शारीरिकं, मानसिकं, आध्यात्मिकं च बलं वर्धते।

3. **पाठात् समुचितं पदं चित्वा अधः रिक्तस्थानानि पूरयन्तु—**

(क) प्रत्येकस्मात् ................ पूर्वम् एकः मंत्रः भवति।

(ख) वयं प्रतिदिनं ............ करवाम।

(ग) स्वस्थं ........... स्वस्थं .......... च प्राप्नवाम।

(घ) एकेन ........... सूर्यनमस्कारस्य बहूनि प्रयोजनानि वदामि।

(ङ) आदित्यस्य .......... ये कुर्वन्ति दिनेदिने।

**उत्तराणि—**(क) सूर्यनमस्कारात् (ख) सूर्यनमस्कारं (ग) शरीरं, मनः, (घ) श्लोकेन, (ङ) नमस्कारान्।

**अधोलिखितानि शब्दरूपाणि पठन्तु अवगच्छन्तु च।**

| लिङ्गम् | शब्दः | चतुर्थी विभक्तिरूपाणि | | |
|---|---|---|---|---|
| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| अकारान्त-पुंलिङ्गम् | छात्र | छात्राय | छात्राभ्याम् | छात्रेभ्यः |
| | नायक | नायकाय | नायकाभ्याम् | नायकेभ्यः |
| | आदित्य | आदित्याय | आदित्याभ्याम् | आदित्येभ्यः |
| आकारान्त-स्त्रीलिङ्गम् | आचार्या | आचार्यायै | आचार्याभ्याम् | आचार्याभ्यः |
| | योगिता | योगितायै | योगिताभ्याम् | योगिताभ्यः |
| | बालिका | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |

| | | | | |
|---|---|---|---|---|
| ईकारान्त– स्त्रीलिङ्गम् | शालिनी | शालिन्यै | शालिनीभ्याम् | शालिनीभ्य: |
| | नदी | नद्यै | नदीभ्याम् | नदीभ्य: |
| | भगिनी | भगिन्यै | भगिनीभ्याम् | भगिनीभ्य: |
| अकारान्त– नपुंसकलिङ्गम् | आसन | आसनाय | आसनाभ्याम् | आसनेभ्य: |
| | भोजन | भोजनाय | भोजनाभ्याम् | भोजनेभ्य: |
| | फल | फलाय | फलाभ्याम् | फलेभ्य: |

### अत्र इदम् अवधेयम् (अब यह जानें)

**'नमः' शब्दस्य योगे चतुर्थी विभक्तिः भवति।**
**यथा— भास्कराय नमः।**

4. **पाठे विद्यमानानां 'नमः' युक्तशब्दानां सङ्ग्रहं कृत्वा लिखन्तु—**

**यथा—** ॐ मित्राय नमः।

(क) .................. (ख) ..................
(ग) .................. (घ) ..................
(ङ) .................. (च) ..................
(छ) .................. (ज) ..................
(झ) .................. (ञ) ..................
(ट) ..................

**उत्तरम्—**

(क) ॐ रवये नमः। (ख) ॐ सूर्याय नमः।
(ग) ॐ भानवे नमः। (घ) ॐ खगाय नमः।
(ङ) ॐ पूष्णे नमः। (च) ॐ हिरण्यगर्भाय नमः।
(छ) ॐ मरीचये नमः। (ज) ॐ आदित्याय नमः।
(झ) ॐ सावित्रे नमः। (ञ) ॐ भाष्कराय नमः।
(ट) ॐ अर्काय नमः।

5. **उदाहरणानुसारं कोष्ठकात् पदानि स्वीकृत्य वाक्यानि रचयन्तु—**

अग्निः, आचार्या, त्रिवर्णध्वजः, जनकः, वृक्षः, देवी, भगिनी, मातामही, जननी, पृथिवी, नदी

**यथा—** अग्नये नमः।

(क) .................. (ख)..................
(ग) .................. (घ) ..................
(ङ) .................. (च) ..................
(छ) .................. (ज) ..................
(झ) .................. (ञ) ..................

**उत्तरम्—** (क) आचार्यायै नमः।
(ख) त्रिवर्णध्वजाय नमः।
(ग) जनकाय नमः।
(घ) वृक्षाय नमः।
(ङ) देव्यै नमः।
(च) भगिन्यै नमः।
(छ) मातामह्यै नमः।
(ज) जनन्यै नमः।
(झ) पृथिव्यै नमः।
(ञ) नद्यै नमः।

### अत्र इदम् अवधेयम् (यहाँ यह जानें)

**दानार्थे (दा-धातोः तथा च यच्छ्-धातोः योगे) चतुर्थी- विभक्तेः प्रयोगः भवति।**

**यथा—** शिक्षकः छात्राय पुस्तकं ददाति।
शिक्षकः छात्राय पुस्तकं यच्छति।

6. **कोष्ठके विद्यमानानां शब्दानां चतुर्थी-विभक्तेः रूपाणि प्रयुज्य वाक्यानि पुनः लिखन्तु—**


यथा—सैनिकः (देश) जीवनं प्रयच्छति। सैनिकः देशाय जीवनं प्रयच्छति।

| | |
|---|---|
| (क) माता (याचक) वस्त्रं ददाति। | ..................................................... |
| (ख) पौत्रः (पितामही) औषधं ददाति। | ..................................................... |
| (ग) अहं (भगिनी) उपायनं ददामि। | ..................................................... |
| (घ) पिता(सेविका) वेतनं ददाति। | ..................................................... |
| (ङ) त्वं (मित्र) पुष्पं ददासि। | ..................................................... |
| (च) देवः (भक्त) आशीर्वादं ददाति। | ..................................................... |
| (छ) आरक्षकः (चोर) दण्डं ददाति। | ..................................................... |

**उत्तरम्—**

| | |
|---|---|
| (क) माता (याचक) वस्त्रं ददाति। | माता याचकाय वस्त्रं ददाति। |
| (ख) पौत्रः (पितामही) औषधं ददाति। | पौत्रः पितामह्यै औषधं ददाति। |
| (ग) अहं (भगिनी) उपायनं ददामि। | अहं भगिन्यै उपायनं ददामि। |
| (घ) पिता(सेविका) वेतनं ददाति। | पितासेविकायै वेतनं ददाति। |
| (ङ) त्वं (मित्र) पुष्पं ददासि। | त्वं मित्राय पुष्पं ददसि। |
| (च) देवः (भक्त) आशीर्वादं ददाति। | देवः भक्ताय आशीर्वादं ददाति। |
| (छ) आरक्षकः (चोर) दण्डं ददाति। | आरक्षकः चोराय दण्डं ददाति। |

**7. उदाहरणानुसारं माता कस्मै/कस्यै धनं ददाति इति कोष्ठके विद्यमानानि पदानि उपयुज्य लिखन्तु—**




(क) ..........माता पुत्र्यै धनं ददाति। ..........

(ख) .............................................

(ग) .............................................

(घ) .............................................

(ङ) .............................................

(च) .............................................

**उत्तरम—** (ख) माता पुत्राय धनं ददाति।

(ग) माता पाचिकायै धनं ददाति।

(घ) माता आपणिकाय धनं ददाति।

(ङ) माता याचकाय धनं ददाति।

(च) माता पितामह्यै धनं ददाति।

**8. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु—**

| | | | | |
|---|---|---|---|---|
| **यथा—** | गणेश — | गणेशाय | गणेशाभ्याम् | गणेशेभ्यः |
| (क) | भक्त — | भक्ताय | ............ | भक्तेभ्यः |
| (ख) | सेविका — | ......... | सेविकाभ्याम् | ............ |
| (ग) | अनुजा — | अनुजायै | ............ | ............ |
| (घ) | गृहिणी — | ......... | गृहिणीभ्याम् | ............ |
| (ङ) | कुमारी — | कुमार्यै | कुमारीभ्याम् | ............ |
| (च) | वन — | वनाय | ............ | ............ |
| (छ) | मित्र — | ......... | ............ | मित्रेभ्यः |

**उत्तरम्—**

| | | | | |
|---|---|---|---|---|
| (क) | भक्त — | भक्ताय | भक्ताभ्याम् | भक्तेभ्यः |
| (ख) | सेविका — | सेविकायै | सेविकाभ्याम् | सेविकाभ्यः |
| (ग) | अनुजा — | अनुजायै | अनुजाभ्याम् | अनुजाभ्यः |
| (घ) | गृहिणी — | गृहिण्यै | गृहिणीभ्याम् | गृहिणीभ्यः |
| (ङ) | कुमारी — | कुमार्यै | कुमारीभ्याम् | कुमारीभ्यः |
| (च) | वन — | वनाय | वनाभ्याम् | वनेभ्यः |
| (छ) | मित्र — | मित्राय | मित्राभ्याम् | मित्रेभ्यः |

# अतिरिक्त अभ्यासः

1. **समुचित विकल्पं चित्वा क्रमाक्षरं लिखत—**

(क) ''देव: भक्ताय आशीर्वादं ददाति।'' अस्मिन् वाक्ये कर्तृपदम् अस्ति—

(अ) देव: (ब) ददाति

(स) भक्ताय (द) आशीर्वादं

(ख) 'सेविका' शब्दस्य चतुर्थीविभक्ते: रूपमस्ति—

(अ) सेविका: (ब) सेविकायै

(स) सेविकाया: (द) सेविकाये

(ग) सूर्य: स्रोतम् अस्ति—

(अ) ऊर्जाया: (ब) धनस्य

(स) रूपस्य (द) ज्ञानस्य

(घ) ''सूर्य:'' शब्द पर्यायपदम् अस्ति—

(अ) मार्तण्ड: (ब) ब्रह्माण्ड

(स) प्रकाण्ड (द) पण्डित:

**उत्तराणि—** (क) (अ), (ख) (ब), (ग) (अ), (घ)(अ)।

2. **रिक्तस्थानानि उचित पदेन पूरयन्तु—**

(क) मीरा ............... नमति। (जनकाय/जनकं)

(ख) .............. सवितरं नमामि। (अहं/त्वं)

(ग) कुमार्यै कुमारीभ्याम् ...। (कुमारीभ्य:/कुमारी)

(घ) ॐ भानवे ............. । (नमाम:/नम:)

**उत्तराणि—** (क) जनकाय (ख) अहम् (ग) कुमारीभ्य: (घ) नम:।

3. **सत्यम् असत्यं च लिखत।**

(क) सर्वे उत्साहेन योगशिक्षिकाया: समीपं गच्छन्ति। ( )

(ख) 'मित्राय नम:' पाठे गणितस्य महत्वं वर्णितमस्ति। ( )

(ग) 'पूषा' सूर्यस्य पर्यायपदमस्ति। ( )

(घ) योगासनै: आध्यात्मिकं बलं प्राप्यते। ( )

**उत्तराणि—** (क) सत्यम् (ख) असत्यम् (ग) सत्यम् (घ) सत्यम्।

4. **सुमेलनं कुरुत—** (सुमेलन कीजिए—)

| 'क' | 'ख' |
|---|---|
| 1. नमोनम: | नम: |
| 2. द्वादशानाम् | सूर्यनमस्कारात् |
| 3. प्रत्येकस्मात् | आसनानाम् |
| 4. ॐ मित्राय | आचार्ये! |

**उत्तरम्—**

| 'क' | 'ख' |
|---|---|
| 1. नमोनम: | आचार्ये! |
| 2. द्वादशानाम् | आसनानाम् |
| 3. प्रत्येकस्मात् | सूर्यनमस्कारात् |
| 4. ॐ मित्राय | नम: |

5. **एकपदेन उत्तरत—**

(क) प्रत्येकस्मात् सूर्यनमस्कारात् पूर्व मंत्र: भवति।

(ख) वयं प्रतिदिनं किं करवाम:?

(ग) स्वस्थं शरीरं स्वस्थं मन: च केन प्राप्नु?

(घ) एकेन श्लोकेन कस्य बहूनि प्रयोजनानि?

(ङ) सूर्यस्य मातु: नाम किम्?

**उत्तरम्—** (क) एक: मंत्र:। (ख) सूर्यनमस्कारम्। (ग) सूर्यनमस्कारेण। (घ) सूर्यनमस्कारस्य। (ङ) अदिति:।

6. **पूर्णवाक्येन उत्तरत्—**

**(क) सर्वे छात्रा: कस्य समीपं योगासनानि ज्ञातुं गच्छन्ति?**

**उत्तरम्—** सर्वे छात्रा: योगासनानि ज्ञातुम् आचार्याया: समीपं गच्छन्ति।

**(ख) योगिता प्रतिदिनं प्रात: केन सह उद्यानं गच्छति?**

**उत्तरम्—** योगिता प्रतिदिनं प्रात: पित्रा सह उद्यानं गच्छति।

**(ग) छात्रा: आचार्यां किं निवेदयन्ति?**

**उत्तरम्—** छात्रा: आचार्यां आसनं शिक्षितुं निवेदनं कुर्वन्ति।

**(घ) आयु:, प्रज्ञा, बलं, वीर्यं, तेज: च केषां जायते?**

**उत्तरम्—** ये दिने दिने आदित्याय नमस्कारान् कुर्वन्ति।

# 4 न लभ्यते चेत् आम्लं द्राक्षाफलम्

(यदि अंगूर नहीं मिले तो उन्हें खट्टा कहा जाता है।)

## वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

1. **एक शृगालः इति गीतस्य साभिनयं कक्षायां गानं कुर्वन्तु।**

**उत्तरम्—** छात्राः स्वमेव कुर्वन्तु।

2. **अधः प्रदत्तानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तरं लिखन्तु—**

**(क) कः वनं गच्छति?**

**उत्तरम्—** शृगालः।

**(ख) शृगालः कां पश्यति?**

**उत्तरम्—** द्राक्षालतां।

**(ग) शृगालस्य मुखे किं जायते?**

**उत्तरम्—** रसम्।

**(घ) शृगालः किं पश्यति?**

**उत्तरम्—** द्राक्षाफलं।

**(ङ) द्राक्षाफलं कुत्र दृश्यते?**

**उत्तरम्—** लतासु उपरि-उपरि।

**(च) किं शृगालः पुनः पुनः उत्पतति?**

**उत्तरम्—** आम्।

**(छ) किं शृगालः द्राक्षाफलं प्राप्नोति?**

**उत्तरम्—** न।

3. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

**(क) शृगालः कथं वनं गच्छति?**

**उत्तरम्—** शृगालः पिपासया बुभुक्षया वनं गच्छति।

**(ख) वनं गत्वा शृगालस्य किं जायते?**

**उत्तरम्—** वनं गत्वा शृगालः श्रान्तः खिन्नः च जायते।

**(ग) शृगालः द्राक्षाफलं कुत्र पश्यति?**

**उत्तरम्—** शृगालः लतासु उपरि-उपरि द्राक्षाफलं पश्यति।

**(घ) द्राक्षाफलं दृष्ट्वा कस्य मुखे रसः जायते?**

**उत्तरम्—** द्राक्षाफलं दृष्ट्वा शृगालस्य मुखे रसः जायते।

**(ङ) अन्ते शृगालः किं वदति?**

**उत्तरम्—** अन्ते शृगालः वदति आम्लं द्राक्षाफलम्।

### अत्र इदम् अवधेयम् (यहाँ यह जानें)

- अस्मिन् पाठे जायते, लभते, पलायते इति एतादृशानि क्रियापदानि सन्ति।
- एतादृशानां क्रियापदानां रूपाणि लट्-लकारे कथं भवन्ति इति पश्याम:—

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | लभते | लभेते | लभन्ते |
| मध्यमः पुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमः पुरुषः | लभे | लभावहे | लभामहे |

4. **उपरि प्रदत्तां मञ्जूषां दृष्ट्वा रिक्तस्थानेषु उचितक्रियापदानि लिखन्तु—**

| | | | |
|---|---|---|---|
| (क) | वन्दते | ................ | ............ |
| | ................ | वन्देथे | ............ |
| | ................ | ................ | वन्दामहे |
| (ख) | पलायते | ................ | ............ |
| | ................ | ................ | .......... |
| | ................ | ................ | .......... |
| (ग) | जायते | ................ | ............ |
| | ................ | ................ | .......... |
| | ................ | ................ | ............ |

**उत्तरम्—**

| | | | |
|---|---|---|---|
| (क) | वन्दते | वन्देते | वन्दन्ते |
| | वन्दसे | वन्देथे | वन्दध्वे |
| | वन्दे | वन्दावहे | वन्दामहे |
| (ख) | पलायते | पलायेते | पलायन्ते |
| | पलायसे | पलायेथे | पलायध्वे |
| | पलाये | पलायावहे | पलायामहे |
| (ग) | जायते | जायेते | जायन्ते |
| | जायसे | जायेथे | जायध्वे |
| | जाये | जायावहे | जायामहे |

5. उदाहरणानुसारम् एकवचनरूपं दृष्ट्वा द्वि वचन- बहुवचनरूपाणि लिखन्तु—

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कम्प् | कम्पते | कम्पेते | कम्पन्ते |
| वर्ध् | वर्धते | ............. | ............. |
| वर्त् | वर्तसे | ............. | ............. |
| प्र + काश् | प्रकाशते | ............. | ............. |
| वन्द् | वन्दे | ............. | ............. |
| याच् | याचते | ............. | ............. |
| लज्ज् | लज्जसे | ............. | ............. |
| वीक्ष् | वीक्षते | ............. | ............. |
| सेव् | सेवे | ............. | ............. |
| वन्द् | वन्दसे | ............. | ............. |
| शुभ् | शोभते | ............. | ............. |

उत्तरम्—

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कम्प् | कम्पते | कम्पेते | कम्पन्ते |
| वर्ध् | वर्धते | वर्धेते | वर्धन्ते |
| वर्त् | वर्तसे | वर्तेथे | वर्तध्वे |
| प्र + काश् | प्रकाशते | प्रकाशेते | प्रकाशन्ते |
| वन्द् | वन्दे | वन्दावहे | वन्दामहे |
| याच् | याचते | याचेते | याचन्ते |
| लज्ज् | लज्जसे | लज्जेथे | लज्जध्वे |
| वीक्ष् | वीक्षते | वीक्षेते | वीक्षन्ते |
| सेव् | सेवे | सेवावहे | सेवामहे |
| वन्द् | वन्दसे | वन्देथे | वन्देध्वे |
| शुभ् | शोभते | शोभेते | शोभन्ते |

6. उदाहरणानुसारं वाक्यद्वयं लिखन्तु—

**यथा**– शत्रुः (पलाय्) शत्रुः पलायते
चोराः (पलाय्) चोराः पलायन्ते।

(क) वृक्षः (वर्ध्) ..........................
बालाः (वर्ध्) ..........................

(ख) छात्रः (वन्द्) ..........................
भक्ताः (वन्द्) ..........................

(ग) वैद्यः (वीक्ष्) ..........................
प्रेक्षकाः (वीक्ष्) ..........................

(घ) कर्मचारी (सेव्) ..........................
महिलाः (सेव्) ..........................

(ङ) वृक्षः (कम्प्) ..........................
रुग्णाः (कम्प्) ..........................

उत्तरम्—

(क) वृक्षः (वर्ध्) वृक्षः वर्धते
बालाः (वर्ध्) बालाः वर्धन्ते।

(ख) छात्रः (वन्द्) छात्रः वन्दते
भक्ताः (वन्द्) भक्ताः वन्दन्ते।

(ग) वैद्यः (वीक्ष्) वैद्यः वीक्षते
प्रेक्षकाः (वीक्ष्) प्रेक्षकाः वीक्षन्ते।

(घ) कर्मचारी (सेव्) कर्मचारी सेवते
महिलाः (सेव्) महिलाः सेवन्ते।

(ङ) वृक्षः (कम्प्) वृक्षः कम्पते
रुग्णाः (कम्प्) रुग्णाः कम्पन्ते।

7. उदाहरणं दृष्ट्वा वाक्यानि उचितरूपैः पूरयन्तु—

(क) शुनकं दृष्ट्वा बालकस्य भयं (जाय्)
शुनकं दृष्ट्वा बालकस्य भयं जायते।

(ख) मूषकः मार्जारं दृष्ट्वा (पलाय्)
.....................................................

(ग) रात्रिकाले मार्गदीपाः (प्रकाश्)
.....................................................

(घ) अहं देवं (वन्द्)
.....................................................

(ङ) त्वं किमर्थं (लज्ज्)
.....................................................

(च) वयं देशं (सेव्)
.....................................................

**उत्तरम्—** (क) शुनकं दृष्ट्वा बालकस्य भयं (जाय्)
शुनकं दृष्ट्वा बालकस्य भयं जायते।
(ख) मूषकः मार्जारं दृष्ट्वा (पलाय्)
मूषकः मार्जारं दृष्ट्वा पलायते।
(ग) रात्रिकाले मार्गदीपाः (प्रकाश्)
रात्रिकाले मार्गदीपाः प्रकाशन्ते।
(घ) अहं देवं (वन्द्)
अहं देवं वन्दे।
(ङ) त्वं किमर्थं (लज्ज्)
त्वं किमर्थं लज्जसे।
(च) वयं देशं (सेव्)
वयं देशं सेवामहे।

## अतिरिक्त अभ्यासः

1. **उचित विकल्पं चित्वा कोष्ठके लिखत—**

(क) लभते, जायते, पलायते। एते पदानि सन्ति—
(अ) परस्मैपदी (ब) आत्मनेपदी
(स) उभयपदी (द) कोऽपि न

(ख) ''आम्लं द्राक्षाफलं - आम्लं द्राक्षाफलं इत्येव कथयति।'' रेखाङ्कित पदस्य उचित विच्छेदम् अस्ति—
(अ) इत्य + एव (ब) इति + एव
(स) इत्ये + व (द) इत + एव

(ग) 'वदति' पदस्य पर्यायपदमस्ति—
(अ) कथयति (ब) पलायते
(स) जायते (द) ऐदिति

(घ) ''आम्लं द्राक्षाफलं - आम्लं द्राक्षाफलं।'' इति कः कथयति?
(अ) शृगालः (ब) कच्छपः
(स) वानरः (द) शिक्षकः

(ङ) ''अनुक्षणं तत्मुखे रसः जायते।'' अत्र 'रसः' पदस्य तात्पर्य अस्ति —
(अ) रसालरसः (ब) द्राक्षारसं
(स) लारः (द) मधुः

**उत्तराणि—**(क) (ब), (ख) (ब), (ग) (अ), (घ) (अ), (ङ) (स)।

2. **उचित पदेन रिक्त स्थानानि पूरयत—**

(क) शृगालः द्राक्षाफलानि .................... इच्छति। (पातुम्/खादितुं)

(ख) अन्ते शृगालः वदति ....................... द्राक्षाफलम्। (आम्लं/तिक्तम्)

(ग) द्राक्षाफलम् ................. पर्यायपदम् अस्ति। (कदलीफलं/ मृद्वीकाफलं)

(घ) स्थीयते पदस्य ................ इति विपरीत पदमस्ति। (पलायते/जायते)

**उत्तराणि—**(क) खादितुं (ख) आम्लं (ग) मृद्वीकाफलम् (घ) पलायते।

3. **सत्यम् असत्यम् विचारयित्वा लिखत—**

(क) मूषकं मार्जारं दृष्ट्वा पलायते। (सत्यम्/असत्यम्)

(ख) शृगालः द्राक्षालतां दृष्ट्वा नृत्यति। (सत्यम्/असत्यम्)

(ग) शृगालः पिपासितः बुभुक्षितः च आसीत्। (सत्यम्/असत्यम्)

(घ) मधुरं द्राक्षाफलं, मधुरं द्राक्षाफलम्। (सत्यम्/असत्यम्)

**उत्तराणि—**(क) सत्यम् (ख) असत्यम् (ग) सत्यम् (घ) असत्यम्।

4. **सुमेलनं कुरुत—**

| | 'क' | 'ख' |
|---|---|---|
| (i) | लभते | (क) कूर्दते। |
| (ii) | जायते | (ख) अवलोक्यते। |
| (iii) | दृश्यते | (ग) भवति। |
| (iv) | उत्पतति | (घ) प्राप्नोति। |

**उत्तरम्—**

| | 'क' | 'ख' |
|---|---|---|
| (i) | लभते | (घ) प्राप्नोति। |
| (ii) | जायते | (ग) भवति। |
| (iii) | दृश्यते | (ख) अवलोक्यते। |
| (iv) | उत्पतति | (क) कूर्दते। |

5. **अधोलिखित प्रश्नानाम् एकपदेन उत्तरत—**

(क) कः बुभुक्षितः पिपासितः च आसीत्?

(ख) कथायाः आधारे शृगालः कस्यां श्रेण्याम् आयाति?
(ग) शृगालः किमर्थम् वनं गच्छति?
(घ) असफले सति शृगालः किं करोति?

उत्तरम्— (क) शृगालः। (ख) अधमः श्रेण्याम्।
(ग) भोजनार्थं जलार्थं च। (घ) पलायन।

6. **पूर्णवाक्येन उत्तरत—**

**(क) कः बुभुक्षितः पिपासितश्च?**

उत्तरम्— शृगालः बुभुक्षितः पिपासितः च।

**(ख) कथायाः आधारे शृगालः कस्यां श्रेण्याम् आयाति?**

उत्तरम्— कथायाः आधारे शृगालः अधम श्रेण्याम् आयाति।

**(ग) शृगालः किमर्थं वनम् गच्छति?**

उत्तरम्— शृगालः भोजनाय वनं गच्छति।

**(घ) इयं कथा किं संदेशं ददाति?**

उत्तरम्— ''न लभते द्राक्षाफलं चेत् आम्लं द्राक्षाफलम्'' इयं संस्कृत साहित्यस्य लोकप्रिय कहावतः अस्ति। यदा कोऽपि वस्तु न लभ्यते तदा अयं कहावतं जनाः प्रयुज्यन्ते।

●●

# 5 सेवा हि परमो धर्मः

(सेवा सर्वश्रेष्ठ धर्म है।)

## वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

1. **अधोलिखितानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तराणि लिखन्तु—**

**(क) कः प्रसिद्धः चिकित्सकः आसीत्?**

उत्तरम्— नागार्जुनः।

**(ख) अन्यस्मिन् दिवसे कौ आगतौ?**

उत्तरम्— द्वौ युवकौ।

**(ग) कः खिन्नः आसीत्?**

उत्तरम्— द्वितीयः युवकः।

**(घ) रुग्णस्य परिस्थितिः कथम् आसीत्?**

उत्तरम्— शोचनीया।

**(ङ) नागार्जुनः सहायकरूपेण कं चितवान्?**

उत्तरम्— द्वितीयं युवकम्।

**(च) कां विना चिकित्सकः न भवति?**

उत्तरम्— सेवाभावनां विना।

**(छ) नागार्जुनः युवकौ केन मार्गेण गन्तुं सूचितवान्?**

उत्तरम्— राजमार्गेण।

2. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

**(क) अहोरात्रं नागार्जुनः कुत्र कार्यं करोति स्म?**

उत्तरम्— सः अहोरात्रं प्रयोगशालायां कार्यं करोति स्म।

**(ख) नागार्जुनः महाराजं किं निवेदितवान्?**

उत्तरम्— सः महाराजं निवेदितवान्- ''महाराज! मम चिकित्साकार्याय एकः सहायकः आवश्यकः'' इति।

**(ग) प्रथमः युवकः कथं कार्यं कृतवान्?**

उत्तरम्— प्रथमः युवकः सेवायाः भावनां विना कार्यं कृतवान्।

**(घ) द्वितीयः युवकः राजमार्गे रोगिणं दृष्ट्वा किं कृतवान्?**

उत्तरम्— सः तं रोगिणं स्वगृहं नीतवान्। दिनद्वयं तस्य सेवाम् अकरोत्।

**(ङ) सेवायाः भावनां विना किं न भवेत्?**

उत्तरम्— सेवाभावनां विना चिकित्सकः न भवेत्।

3. **उदाहरणानुसारम् अधोलिखितानां पदानां स्त्रीलिङ्गरूपाणि लिखन्तु—**

| | | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | पठितवान् | पठितवती | पठितवत्यः |
| (ख) | गतवान् | ............... | |
| (ग) | लिखितवान् | ............... | |
| (घ) | खादितवान् | ............... | |
| (ङ) | क्रीडितवान् | ............... | |
| (च) | हसितवान् | ............... | |
| (छ) | निवेदितवान् | ............... | |
| (ज) | सूचितवान् | ............... | |

**उत्तरम्—**

| | | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| (ख) | गतवान् | गतवती | गतवत्यः |
| (ग) | लिखितवान् | लिखितवती | लिखितवत्यः |
| (घ) | खादितवान् | खादितवती | खादितवत्यः |
| (ङ) | क्रीडितवान् | क्रीडितवती | क्रीडितवत्यः |
| (च) | हसितवान् | हसितवती | हसितवत्यः |
| (छ) | निवेदितवान् | निवेदितवती | निवेदितवत्यः |
| (ज) | सूचितवान् | सूचितवती | सूचितवत्यः |

**4. उदाहरणानुसारम् अधोलिखितानां पदानां पुंलिङ्गरूपाणि लिखन्तु—**

| | | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| (क) | पठितवती | पठितवान् | पठितवन्तः |
| (ख) | कृतवती | ............ | ............ |
| (ग) | दृष्टवती | ............ | ............ |
| (घ) | दत्तवती | ............ | ............ |
| (ङ) | प्रक्षालितवती | ............ | ............ |
| (च) | धावितवती | ............ | ............ |

**उत्तरम्—**

| | | **एकवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| (क) | पठितवान् | पठितवान् | पठितवन्तः |
| (ख) | कृतवती | कृतवान् | कृतवन्तः |
| (ग) | दृष्टवती | दृष्टवान् | दृष्टवन्तः |
| (घ) | दत्तवती | दत्तवान् | दत्तवन्तः |
| (ङ) | प्रक्षालितवती | प्रक्षालितवान् | प्रक्षालितवन्तः |
| (च) | धावितवती | धावितवान् | धावितवन्तः |

**5. उदाहरणानुसारं वाक्यानि परिवर्तयन्तु—**

**यथा**– पिता कषायं पिबति। पिता कषायं पीतवान्।

अहं पुस्तकं नयामि। अहं पुस्तकं नीतवान्/नीतवती।

(क) युवकः आपणं गच्छति। ..............................

(ख) सः रोटिकां खादति। ..............................

(ग) महिला वस्त्रं ददाति। ..............................

(घ) बालकः द्विचक्रिकातः पतति। ..............................

(ङ) पितामही चलच्चित्रं पश्यति। .....................

(च) अहं गृहपाठं लिखामि। ..............................

(छ) त्वं कुत्र गच्छसि? ..............................

(ज) अश्वाः वने धावन्ति। ..............................

(झ) बालिकाः शीघ्रम् आगच्छन्ति। ..............................

(ञ) वयं समुद्रतीरे पयोहिमं खादामः। ..............................

**उत्तरम्—**

| | | |
|---|---|---|
| (क) | युवकः आपणं गच्छति। | युवकः आपणं गतवान्। |
| (ख) | सः रोटिकां खादति। | सः रोटिकां खादितवान्।। |
| (ग) | महिला वस्त्रं ददाति। | महिला वस्त्रं दत्तवती। |
| (घ) | बालकः द्विचक्रिकातः पतति। | बालकः द्विचक्रिकात् पतितवान्। |
| (ङ) | पितामही चलच्चित्रं पश्यति। | पितामही चलच्चित्रं दृष्टवती। |
| (च) | अहं गृहपाठं लिखामि। | अहं गृहपाठं लिखितवान् लिखितवती। |
| (छ) | त्वं कुत्र गच्छसि? | त्वं कुत्र गतवान्/ गतवती। |
| (ज) | अश्वाः वने धावन्ति। | अश्वाः वने धावितवन्तः। |
| (झ) | बालिकाः शीघ्रम् आगच्छन्ति। | बालिकाः शीघ्रम् आगतवत्यः। |
| (ञ) | वयं समुद्रतीरे पयोहिमं खादामः। | वयं समुद्रतीरे पयोहिमं खादितवन्तः। |

## अत्र इदम् अवधेयम् (यहाँ यह जानें)

वर्तमानकाल-क्रियापदेन सह 'स्म' इति अव्ययस्य योजनेन भूतकालस्य अर्थः भवति।

**यथा**– सः बाल्ये पुस्तकानि पठति।

सः बाल्ये पुस्तकानि पठति स्म (अपठत्।

(वर्तमानकाल के क्रियापद के साथ 'स्म' अव्यय जोड़ने से भूतकाल का अर्थ होता है।)

**6. अनुच्छेदे कोष्ठकेषु केचन धातवः दत्ताः सन्ति। उपरि दत्तम् अवधेयांशं पठित्वा 'स्म' इति अव्ययपदम् उपयुज्य अनुच्छेदं पुनः लिखन्तु—**

.................... (शीर्षकं लिखन्तु)

कृषकः प्रतिदिनं कृषिक्षेत्रं ....(गच्छ्) । जलसेचनं .................... (कृ)। कीटानां निवारणार्थं जैवौषधं........... (स्थापय्)। सः कृषिकार्यं सम्यक् .................. (ज्ञा)। अतः अन्ये कृषकाः संशयेन

.......(पृच्छ्)। सः स्वाभिमानेन ..... (जीव्)। अतः 'अहं कृषकः भूमिपुत्रः' इति साभिमानं .............. (वद्)। सः क्षेत्रे गोमयं ................ (योजय्), न तु कृतकान् पदार्थान्। अतः व्रीहेः गुणवत्ता अधिका ............ (भव्)। जनाः जालपुटमाध्यमेन तस्य तण्डुलं ................ (क्रीण्)। एवं तस्य परिवारस्य सर्वे जनाः कृषिकार्येण ससुखं ...........(जीव्)। सः सर्वान् ........... (वद्) ''कृषकः न दीनः न च दरिद्रः, परं सर्वेषां पोषकः'' इति।

**उत्तरम्—** **कृषकः भूमिपुत्रः**

कृषकः प्रतिदिनं कृषिक्षेत्रं गच्छति स्म। जलसेचनं करोति स्म।

कीटानां निवारणार्थं जैवौषधं स्थापयति स्म। सः कृषिकार्यं सम्यक् जानाति स्म। अतः अन्ये कृषकाः संशयेन पृच्छति स्म। सः स्वाभिमानेन जीवति स्म। अतः 'अहं कृषकः भूमिपुत्रः' इति साभिमानं वदति स्म। सः क्षेत्रे गोमयं योजयति स्म, न तु कृतकान् पदार्थान्। अतः व्रीहेः गुणवत्ता अधिका भवति स्म। जनाः जालपुटमाध्यमेन तस्य तण्डुलं क्रीणन्ति स्म। एवं तस्य परिवारस्य सर्वे जनाः कृषिकार्येण ससुखं जीवन्ति स्म। सः सर्वान् वदति स्म ''कृषकः न दीनः न च दरिद्रः, परं सर्वेषां पोषकः'' इति।

## अतिरिक्त अभ्यासः

**1. उचितं विकल्पं चित्वा कोष्ठके लिखत—**

(क) किम् परमोधर्मः?

(अ) दान (ब) दया

(स) सेवा (द) धर्मः

(ख) भारतीय सेनायाः आदर्शः वाक्यः अस्ति—

(अ)अहिंसा परमो धर्मः

(ब) वेदः धर्मो मूलः

(स) सेवा हि परमो धर्मः

(द) मानव सेवा हि ईश्वरस्य सेवा अस्ति

(ग) मानवीयः गुणैः कः बुद्धः जातः?

(अ) सिद्धार्थः (ब) यथार्थः

(स) महावीरः (द) गौतम

(घ) सत्यं, करुणा, उदारता, सेवा, परोपकारः अक्रोधः इत्यादयः गुणाः सन्ति— (सत्य, करुणा, उदारता, सेवा, परोपकार, अक्रोध इत्यादि गुण हैं—)

(अ) दानवीयाः (ब) मानवीयाः

(स) पाशविकाः (द) जीवानाम्

(ङ) ''सेवा हि परमो धर्मः।'' अस्मिन् वाक्ये 'सेवा' पदे लिंगम् अस्ति –

(अ) स्त्रीलिंगम् (ब) पुल्लिंगम्

(स) नपुंसकलिंगम् (द) न कोऽपि

**उत्तराणि—**(क) (स), (ख) (स), (ग) (अ), (घ) (ब), (ङ) (अ)।

**2. उचित पदेन रिक्तस्थानानि पूरयत—**

(क) 'रसायनम्' इति शब्दः आयुर्वेद शास्त्रे ......... इत्यस्मिन् विषये प्रयुज्यते।(औषधम्/मिष्टान्नम्)

(ख) ......... केचन् योग्याः युवकाः आगमिष्यन्ति। (ह्यः/श्वः)

(ग) एकदा सः .............. निवेदितवान्। (महाराज्ञीम्/महाराजं)

(घ) ''गमनसमये .............. गच्छताम्।'' (गगनमार्गे/ राजमार्गे)

**उत्तराणि—**(क) औषधम् (ख) श्वः (ग) महाराजं (घ) राजमार्गे।

**3. सत्यम् असत्यम् वा चित्वा लिखत।**

(क) ''भ्रातुः उदरवेदना, मातुः ज्वरवेदना।'' ( )

(ख) अन्यस्मिन् दिने एकः युवकः आगतवान्। ( )

(ग) नागार्जुनः प्रसिद्ध वायुयानः विशेषज्ञः आसीत्। ( )

(घ) द्वितीयः युवकः रुग्णजनस्य सेवाम् अकरोत्। ( )

**उत्तराणि—**(क) असत्यम्(ख) असत्यम् (ग) असत्यम् (घ) सत्यम्।

**4. सुमेलनं कुरुत –**

| 'क' | 'ख' |
|---|---|
| (क) रसायनशास्त्रज्ञ | (i) खिन्नः |
| (ख) दुःखितः | (ii) औषधशास्त्रस्य ज्ञाता |
| (ग) अस्वस्थम् | (iii) दिनरात |
| (घ) अहोरात्रम् | (iv) रोगिणम् |

**उत्तरम्—**

| 'क' | 'ख' |
|---|---|
| (क) रसायनशास्त्रज्ञ | (ii) औषधशास्त्रस्यज्ञाता |
| (ख) दु:खितः | (i) खिन्नः |
| (ग) अस्वस्थम् | (iv) रोगिणम् |
| (घ) अहोरात्रम् | (iii) दिन-रात |

5. **अधोलिखित प्रश्नानाम् एकपदेन उत्तरत—**

(क) नागार्जुनः कस्मिन् क्षेत्रे प्रसिद्ध आसीत्?

(ख) द्वौ युवकौ कदा आगतौ?

(ग) गतवान् पृष्टवान्, चितवान् इत्यादिषुः पदेषु प्रत्यय अस्ति।

(घ) नागार्जुनः द्वितीयं युवकं केन रूपेण चितवान्।

(ङ) सेवां विना चिकित्सकः न भवति। रेखाङ्कितः पदे विभक्तिः कारणं लिखत—

**उत्तरम्—** (क) चिकित्साक्षेत्रे। (ख) अन्यस्मिन् दिने। (ग) क्तवतु प्रत्ययः। (घ) सहायकरूपेण। (ङ) द्वितीया विभक्तिः, बिना शब्द योगे।

6. **पूर्णवाक्येन उत्तरत—**

**(क) मानवीयः गुणैः सिद्धार्थः किम् जातः?**

**उत्तरम्—** मानवीयैः गुणैः सिद्धार्थः 'महात्मा बुद्धः' जातः।

**(ख) रोगिणं दृष्ट्वा प्रथमः युवकः किं कृतवान्?**

**उत्तरम्—** रोगिणं दृष्ट्वा प्रथमः युवकः अग्रे गतवान्।

**(ग) राजमार्गेण गन्तव्यम् इति कः कान् सूचितवान्?**

**उत्तरम्—** राजमार्गेण गन्तव्यम् इति नागार्जुनः द्वौ युवकौ सूचितवान्।

**(घ) 'क्तवतु' प्रत्ययस्य प्रयोगः कस्मिन् लकारार्थे भवति?**

**उत्तरम्—** 'क्तवतु' प्रत्ययस्य प्रयोगः लङ्लकारार्थे भवति।

●●

# 6 क्रीडाम वयं श्लोकान्त्याक्षरीम्

(हम सब श्लोक अन्त्याक्षरी खेलते हैं)

## वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

1. **अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तरं लिखन्तु—**

**(क) विद्याहीनाः कीदृशाः किंशुकाः इव न शोभन्ते?**

**उत्तरम्—** निर्गन्धाः।

**(ख) धीमतां कालः कथं गच्छति?**

**उत्तरम्—** काव्यशास्त्र विनोदेन।

**(ग) केषां कालः निद्रया कलहेन वा गच्छति?**

**उत्तरम्—** खलनाम्।

**(घ) खलस्य विद्या किमर्थम्?**

**उत्तरम्—** विवादाय।

**(ङ) सज्जनस्य विद्या किमर्थम्?**

**उत्तरम्—** ज्ञानाय।

**(च) चन्द्रः केषां भूषणम् अस्ति?**

**उत्तरम्—** ताराणाम्।

**(छ) सर्वधनप्रधानं किम्?**

**उत्तरम्—** विद्या।

2. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु —**

**(क) निर्गन्धाः किंशुकाः इव के न शोभन्ते?**

**उत्तरम्—** निर्गन्धाः किंशुकाः इव विद्याहीनाः न शोभन्ते।

**(ख) मूर्खाणां कालः कथं गच्छति?**

**उत्तरम्—** मूर्खाणां कालं निद्रया, कलहेन, व्यसनेन वा गच्छति।

**(ग) दुर्जनः विद्यायाः धनस्य शक्तेः च उपयोगं कथं करोति?**

**उत्तरम्—** दुर्जनस्य विद्या विवादाय, धनं मदाय, शक्तिः परेषां परिपीडनाय भवति।

**(घ) कीदृशाः मनुष्याः भुवि भारभूताः भवन्ति?**

**उत्तरम्—** विद्याविहीनाः मनुष्याः भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति।

**(ङ) शनैः शनैः कानि साधनीयानि?**

**उत्तरम्—** पन्थाः, कन्थाः, पर्वतारोहणं विद्या वित्त च शनैः शनैः साधनीयानि।

3. **उचितान् वाक्यांशान् परस्परं संयोजयन्तु—**

| (क) | (ख) |
|---|---|
| • तदा वृत्तिश्च कीर्तिश्च | पञ्चैतानि शनैः शनैः |
| • खलस्य साधोर्विपरीतमेतत् | निर्गन्धा इव किंशुकाः |
| • शनैर्विद्या शनैर्वित्तं | यदा विद्या भवेत्तव |
| • विद्याहीना न शोभन्ते | न भातृभाज्यं न च भारकारि |
| • न चोरहार्यं न च राजहार्यम् | ज्ञानाय दानाय च रक्षणाय |
| • विद्या राजसु पूज्यते | विद्याभ्यासं समाचरेत् |
| • अतो धर्मार्थमोक्षेभ्यः | न हि धनम् |

**उत्तरम्—**

1. तदा वृत्तिश्च कीर्तिश्च — यदा विद्या भवेत्तव
2. खलस्य साधोर्विपरीतमेतत् — ज्ञानाय दानाय च रक्षणाय
3. शनैर्विद्या शनैर्वित्तं — पञ्चैतानि शनैः शनैः
4. विद्याहीना न शोभन्ते — निर्गन्धा इव किंशुकाः
5. न चोरहार्यं न च राजहार्यम् — न भातृभाज्यं न च भारकारि
6. विद्या राजसु पूज्यते — न हि धनम्
7. अतो धर्मार्थमोक्षेभ्यः — विद्याभ्यासं समाचरेत्

4. **उदाहरणानुसारम् अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु —**

(क) राजा पृथिव्याः भूषणं भवति।
— राजा कस्याः भूषणं भवति?

(ख) साधोः विद्या ज्ञानाय भवति।
— ....................विद्या ज्ञानाय भवति।

(ग) विद्या गुरूणां गुरु।
— विद्या....................गुरुः?

(घ) ते मर्त्यलोके भुवि भारभूताः भवन्ति।
— ते मर्त्यलोके भुवि....................भवन्ति?

(ङ) विद्याहीनाः न शोभन्ते।
— ....................न शोभन्ते?

(च) सर्वस्य लोचनं शास्त्रम्।
—सर्वस्य लोचनं.................. ?

(छ) विद्या राजसु पूज्यते।
— .................... राजसु पूज्यते?

(ज) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्
— ....................धीमतां कालो गच्छति?

**उत्तरम्—** (ख) कस्यः विद्या ज्ञानाय भवति।
(ग) विद्या केषां गुरुः?
(घ) ते मर्त्यलोके भुवि कीदृशा भवन्ति?
(ङ) के न शोभन्ते?
(च) सर्वस्य लोचनं किम् ?
(छ) का राजसु पूज्यते?
(ज) कथं धीमतां कालो गच्छति?

5. **मञ्जूषातः समुचितानि पदानि स्वीकृत्य रिक्तस्थानानि पूरयन्तु—**

रक्षणाय, मदाय, विवादाय, परिपीडनाय, ज्ञानाय, दानाय

| | सज्जनस्य | | दुर्जनस्य |
|---|---|---|---|
| शक्तिः | .......... | शक्तिः | .......... |
| विद्याः | .......... | विद्या | .......... |
| धनम् | .......... | धनम् | .......... |

उत्तरम्—

| | सज्जनस्य | | दुर्जनस्य |
|---|---|---|---|
| शक्तिः | रक्षणाय | शक्तिः | परिपीडनाय |
| विद्याः | ज्ञानाय | विद्या | विवादाय |
| धनम् | दानाय | धनम् | मदाय |

6. **उदाहरणानुसारम् अधोलिखितानां पदानां विभक्तिं वचनं च लिखन्तु —**

यथा— ताराणाम् — षष्ठी विभक्तिः बहुवचनम्

(क) विद्याम् — ................ .............
(ख) धनस्य — ................ .............
(ग) कलहेन — ................ .............
(घ) नराणाम् — ................ .............
(ङ) मर्त्यलोके — ................ .............
(च) ज्ञानाय — ................ .............
(छ) राजसु — ................ .............

**उत्तरम्—**

(क) विद्याम् — द्वितीया विभक्ति एकवचनम्
(ख) धनस्य — षष्ठी विभक्ति एकवचनम्
(ग) कलहेन — तृतीया विभक्ति एकवचनम्
(घ) नराणाम् — षष्ठी विभक्ति बहुवचनम्
(ङ) मर्त्यलोके — सप्तमी विभक्ति एकवचनम्
(च) ज्ञानाय — चतुर्थी विभक्ति एकवचनम्
(छ) राजसु — सप्तमी विभक्ति बहुवचनम्

## अतिरिक्त अभ्यासः

1. **उचित उत्तरं चित्वा क्रमाक्षरं लिखत्—**

(क) विशाल कुल सम्भवः अपि विद्या विहीना काः इव न शोभन्ते?
(अ) निर्गन्धा (ब) निर्गन्धाः इव किंशुका
(स) पत्रहीन वृक्षः (द) मूर्खः

(ख) किंशुकस्य का विशेषता?
(अ) पुष्पेगुच्छदितः
(ब) पुष्पाणि निर्गन्धानि भवन्ति
(स) मनोहराणि पुष्पानि
(द) सर्वाः

(ग) रूपस्य अपेक्षा का श्रेष्ठा?
(अ) विद्या (ब) लक्ष्मी
(स) शक्ति (द) बुद्धिः

(घ) कस्य पुष्पेषु सुगन्धिः न भवति?
(अ) निम्ब (ब) उदम्बरम्
(स) शाम्भली (द) किंशुकस्य

**उत्तराणि—**(क) (ब), (ख) (द), (ग) (अ), (घ) (द)।

2. **समुचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) विद्याहीना न शोभन्ते ................ इव किंशुकाः।
(ख) न विद्यया विना ................... ।
(ग) अतो ................ विद्याभ्यासं समाचरेत्।
(घ) विद्यानाम नरस्य ...................... ।

**उत्तराणि—**(क) निर्गन्धाः (ख) सुखम् (ग) धर्मार्थ मोक्षेभ्यः (घ) रूपमधिकम्।

3. **सत्यम् असत्यं वा चित्वा लिखत—**

(क) सज्जनानां विद्या विवादाय। ( )
(ख) दुर्जनानां शक्तिः रक्षणाय। ( )
(ग) साधोः धनम् दानाय। ( )
(घ) सज्जनस्य सामर्थ्यं रक्षणाय। ( )

**उत्तराणि—**(क) असत्यम् (ख) असत्यम् (ग) सत्यम् (घ) सत्यम्।

4. **सुमेलनं कुरुत** - (उचित मेल कीजिए—)

| 'क' | 'ख' |
|---|---|
| (क) ज्ञानाय | (i) वञ्चनाय |
| (ख) दानाय | (ii) परिपीडनाय |
| (ग) रक्षणाय | (iii) मदाय |
| (घ) सहयोगाय | (iv) विवादाय |

**उत्तरम्—**

| 'क' | 'ख' |
|---|---|
| (क) ज्ञानाय | (ii) विवादाय |
| (ख) दानाय | (i) मदाय |
| (ग) रक्षणाय | (iv) परिपीडनाय |
| (घ) सहयोगाय | (iii) वञ्चनाय |

5. **अधोलिखित प्रश्नान् एकपदेन उत्तरत—**

(क) किंशुक पुष्पं कीदृशं भवति?
(ख) किंशुकः इव कः न शोभते?
(ग) विशाल कुल सम्भवस्य अपेक्षा कः श्रेयष्करः?
(घ) किं पुष्पं निर्गन्धं भवति?

**उत्तरम्—**(क) निर्गन्धम्। (ख) विद्याविहीनः। (ग) विद्यावान्। (घ) किंशुकम्।

6. **पूर्णवाक्येन उत्तरत—**

**(क) विद्या कस्य भूषणम्?**

**उत्तरम्—** विद्या सर्वस्य भूषणम्।

**(ख) सर्वेषु धनेषु किं धनं प्रधानम्?**

**उत्तरम्—** विद्या सर्वस्य भूषणम्।

**(ग) कि धनं व्यये कृते अपि वर्धते?**

**उत्तरम्—** विद्याधनं व्यये कृते अपि वर्धते?

**(घ) विद्यां विना नराणां किं न जायते?**

**उत्तरम्—** विद्यां विना नराणां न जायते सुखम्।

7

# ईशावास्यम् इदं सर्वम्

(यह सब संसार ईश्वर से व्याप्त है।)

## वयम् अभ्यासं कुर्मः (हम अभ्यास करें)

1. **अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु—**

(क) दैत्यराजः कः?

(ख) के हरिण्यकशिपुं ध्यायन्ति?

(ग) किं देवेभ्यः न दास्यन्ति?

(घ) कस्य दलनेन अपि सः जीवति?

(ङ) राक्षसाः कुतः प्रह्लादं पातितवन्तः?

(च) हिरण्यकशिपुः कस्मात् वरं प्राप्तवान्?

(छ) हरिः कुत्र अस्ति इति कः वदति?

**उत्तरम्—** (क) हिरण्यकशिपुः। (ख) जनाः। (ग) यज्ञभागादिकम्। (घ) गजपददलनेन। (ङ) उत्तुङ्शिखरात्। (च) ब्राह्मणः। (छ) हिरण्यकशिपुः।

2. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु—**

